2473

संस्कृतवेदान्त

मं. नं. ३१

अवधूतगीता

४६४/२

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

।।अथावधूतगीताप्रारंभः श्रीशांर्यंदेव।।

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(२)

अ० गी०

श्रीशंकरंवंदे ॥ ॐ ॥ क्वचित्त्यागीक्वचिद्भोगीक्वचिन्नग्नपिशाचवत् ॥ दत्तात्रेयोहरिःसाक्षाद्वसे
त्सिंहाद्रिमस्तके ॥ १ ॥ श्रीदत्तात्रेयउवाच ॥ ईश्वरानुग्रहादेवपुंसाऽमद्वैतकल्पना ॥ महाभयपरित्राण
१ द्विप्राणामुपजायते ॥ २ ॥ येनेदंपूरितंसर्वंआत्मनैवात्मनात्मनि ॥ निराकारंकथंदेवंह्यभिन्नंशिवम
व्यं ॥ ३ ॥ पंचभूतात्मकंविश्वंमरीचीजलसंनिभं ॥ कस्याप्यहोनमस्कारमहमेकंनिरंतरं ॥ ४ ॥ आत्मै
वंकेवलंसर्वंभेदाभेदोनविद्यते ॥ अस्तिनास्तिकथंब्रूयांविस्मयःप्रतिभातिमे ॥ ५ ॥ वेदांतसारस
र्वस्वंज्ञानविज्ञानमेवच ॥ अहंचात्मानिराकारंसर्ववेद्धिस्वभावतः ॥ ६ ॥ यावैसर्वात्मकोदेवोनिष्क
लोगगनोपमं ॥ स्वभावनिर्मलःशुद्धःसएवाहंनसंशयः ॥ ७ ॥ अहमेवाव्ययोनंतस्तत्तोविज्ञानविग्र
हः ॥ सुखंदुःखंनजानामिकथंकस्यापिवर्तते ॥ ८ ॥ नमानसंकर्मशुभाशुभंमेनवाचिकंकर्मशुभा
शुभंमे ॥ नकायिकंकर्मशुभाशुभंमेज्ञानामृतंशुद्धमतींद्रियोहं ॥ ९ ॥ मनातीतंमनःसर्वंमनोवैसर्वतो शिव
मुखं ॥ मनोवैगगनाकारंनमनःपरमार्थतः ॥ १० ॥ अहमेकमिदंसर्वंव्योमाकारंनिरंतरं ॥ पश्यामिकथ १

(2A)

मात्मानंप्रत्यक्षंचातिरोहितं॥११॥त्वमेवमेकोहिकथंनबुध्यसेसमंहिसर्वेषुवशिष्टमद्वयं॥सदोदितो
ऽसित्वमखंडितःप्रभोदिवाचनक्तंचकथंहिमन्यसे॥१२॥आत्मानंसततंविद्धिसर्वत्रैकंनिरंतरं॥अहं
ध्यातापरंध्येयमखंडंखंड्यसेकथं॥१३॥नजातोसिमृतोसित्वंनतेदेहःकदाचन॥सर्वंब्रह्मेतिविख्यातं
ब्रवीतिबहुधाश्रुतिः॥१४॥सबाह्याभ्यंतरंचेतिसर्वंसर्वत्रसर्वदा॥संयोगश्चवियोगश्चवर्त्तेतेनचतेन
मे॥१५॥इतस्ततःकथंभ्रांतःप्रधावसिपिशाचवत्॥नत्वंनाहंजगन्नेदंसर्वमात्मैवकेवलं॥१६॥शब्दा
क दिपंचकस्यास्यनैवासित्वंनतेपुनः॥त्वमेवपरमंतत्त्वंमनःकिंपरितप्यसि॥१७॥जन्ममृत्युर्नतेचित्तंबं
धमोक्षौशुभाशुभौ॥कथंरोदसिरेवत्सनामरूपंनतेनमे॥१८॥अहोचित्तकथंभ्रांतःप्रधावसिपि
शाचवत्॥अभिन्नंपश्यचात्मानंरागत्यागात्सुखीभव॥१९॥त्वमेवतत्त्वंहिविकारवर्जितंनिष्कंपमे
कंहिविमोक्षविग्रहं॥नतेचरागोह्यथवाविरागःकथंहिसंतप्यसिकामकामः॥२०॥वदंतिश्रुतयःस
र्वानिर्गुणंशुद्धमव्ययं॥अशरीरंसमंतत्त्वंतन्मांविद्धिनसंशयः॥२१॥साकारमनृतंविद्धिनिराकारं

(3)



निरंतरं ॥ एतत्तत्त्वोपदेशेन न पुनर्भवसंभवः ॥ २२ ॥ एकानेकं समं तत्वं वदंति हि विपश्चितः ॥
रागत्यागात्पुनश्चित्तमेकानेकं न विद्यते ॥ २३ ॥ अनात्मरूपं च कथं समाधिरात्मस्वरूपं च कथं
२ समाधी ॥ अस्तीति नास्तीति कथं समाधीर्मोक्षस्वरूपं यदि सर्वमेकं ॥ २४ ॥ विशुद्धोसि समं तत्वं
विदेहस्त्वमजोव्ययं ॥ जानामि च न जानामि आत्मानं मन्यसे कथं ॥ २५ ॥ तत्वमस्यादिवाक्येन आ
त्मा हि प्रतिपादितः ॥ नेति नेति श्रुतिर्ब्रूयादनृतं पांचभौतिकं ॥ २६ ॥ आत्मन्येवात्मना सर्वं त्वया
पूर्णं निरंतरं ॥ ध्याता ध्यानं न ते चित्तं निर्लज्जं ध्यायसे कथं ॥ २७ ॥ शिवं न जानामि कथं वदामि शि
वं च जानामि कथं वदामि ॥ अहं शिवश्चेत्परमार्थरूपं स्वच्छप्रभावं गगनोपमं च ॥ २८ ॥ न समं ना
समं तत्वं कल्पनाहेतुवर्जितं ॥ ग्राह्यग्राह्यविनिर्मुक्तः स्वसंवेद्यं कथं भवेत् ॥ २९ ॥ अनत्वरूपं न हि
वस्तु किंचित्तत्वस्वरूपं न हि वस्तु किंचित् ॥ आत्मैवरूपं परमार्थतत्वं न हिंसको वापि न चापि हिं शिव
स्यः ॥ ३० ॥ विशुद्धोसि समं तत्वं विदेहं सर्वतो मुखं ॥ विभ्रमः कथमात्मार्थे निर्भ्रांतोहं कथं पुनः ॥ ३१ ॥ २

(3A)

घटे भिन्ने घटाकाशं सूलिनं भेदवर्जितं ॥ शिवेन मनसा नंदनू भेदः किं प्रतिभाति मे ॥३२॥ न घटो न घटाका
शं न जीवो जीवविग्रहः ॥ केवलं ब्रह्म संविद्धि वेद्यवेदकवर्जितं ॥३३॥ सर्वत्र सर्वदा सर्वमात्मानं सहजं ध्रुवं ॥
सर्वं शून्यमशून्यं च तन्मां विद्धि न संशयः ॥३४॥ वेदा न लोका न सुरा न यज्ञा वर्णाश्रमो नैव कुलं न जातिः ॥ न
धूम्रमार्गो न च दीप्तिमार्गो ब्रह्मैकरूपः परमार्थतत्त्वं ॥३५॥ व्याप्यव्यापकनिर्मुक्तं त्वमेकः सकलं यदि ॥ प्र
त्यक्षं चापरोक्षं वा आत्मानं मन्यसे कथं ॥३६॥ अद्वैतं केचिदिच्छंति द्वैतमिच्छंति चापरे ॥ समं तत्त्वं न विं
दंति द्वैताद्वैतविवर्जितं ॥३७॥ श्वेतादिवर्णरहितं शब्दरूपविवर्जितं ॥ कथयंति कथं तत्त्वं मनोवाचामगो
चरं ॥३८॥ यदानृतमिदं सर्वं देहादि गगनोपमं ॥ तदा हि ब्रह्म संविद्धि न ते द्वैतपरात्परं ॥३९॥ परेण
सहजात्मापि ह्यभिन्नः प्रतिभाति मे ॥ व्योमाकारं तथैवैकं ध्याता ध्यानं कथं भवेत् ॥४०॥ यत्करोमि
यदश्नामि यज्जुहोमि ददामि यत् ॥ एतत्सर्वं न मे किंचिद्विशुद्धोहमजोव्ययः ॥४१॥ सर्वं जगद्विद्धि निरा
कृतिं च सर्वं जगद्विद्धि विकारहीनं ॥ सर्वं जगद्विद्धि विशुद्धदेहं सर्वं जगद्विद्धि शिवैकरूपं ॥४२॥ तत्त्वं त्वं

हि न संदेहः किं न जानामि वा पुनः ॥ असंवेद्यं च संवेद्यं आत्मानं मन्यसे कथं ॥ ४३ ॥ मायातीतं क
थं तेस्ती मायास्थानं न विद्यते ॥ तत्वमेवमिदं सर्वं व्योमाकारं निरंजनं ॥ ४४ ॥ आदिमध्यांतमुक्तोहं
न बद्धोहं कदाचन ॥ स्वभावनिर्मलः शुद्ध इति मे निश्चला मतिः ॥ ४५ ॥ महदादि जगत्सर्वं न किंचि
त्प्रतिभाति मे ॥ ब्रह्मैव केवलं सर्वं कथं वर्णाश्रमस्थितिः ॥ ४६ ॥ जानामि सर्वथा सर्वं अहमेको नि
रंतरं ॥ निरालंबमशून्यं च शून्यं व्योमादि पंचकं ॥ ४७ ॥ न पुंसकं न पुमान् स्त्री न चोद्धारो न क
ल्पना ॥ सानंदं वा निरानंदं आत्मानं मन्यसे कथं ॥ ४८ ॥ षडंगयोगो न तु नैव बुद्धो गुरूपदेशो न
न तु नैव बुद्धः ॥ मनोविनाशो न तु नैव बुद्धः स्वयं च तत्वं स्वयमेव बुद्धः ॥ ४९ ॥ न हि पंचात्मको
देहो विदेहो वर्त्तते न हि ॥ आत्मैव केवलं सर्वं तुर्यं न च त्रयं कथं ॥ ५० ॥ न बद्धो नैव मुक्तोहं न चा
हं ब्रह्मणः पृथक् ॥ न कर्त्ता नैव भोक्ताहं व्याप्यव्यापकवर्जितः ॥ ५१ ॥ यथा जलं जले न्यस्तं सलिली शिव
नं भेदवर्जितं ॥ प्रकृतिः पुरुषस्तद्वद भिन्नं प्रतिभाति मे ॥ ५२ ॥ यदि नाम न मुक्तोसि न बद्धोसि क ३

(9A)

थाच न ॥ साकारं च निराकारं आत्मानं मन्यसे कथं ॥ ५३ ॥ जानामि ते परं रूपं प्रत्यक्षं गगनोपमं ॥
तथा परं च रूपं यन्मरीचिजलसंन्निभं ॥ ५४ ॥ न गुरुर्नोपदेशश्च नचोपाधिर्नेमे क्रिया ॥ विदेहं
गगनं विद्धि विशुद्धोहं स्वभावतः ॥ ५५ ॥ विशुद्धोसीश्वरोसि त्वं न ते चित्त परात्परं ॥ अहं चात्मा प
रं तत्त्वं त्वमेव वक्तुं न लज्जसे ॥ ५६ ॥ कथं रोदिसि रे चित्त आत्मनैवात्मना भव ॥ पिब वत्स कलातीत
मद्वैतं परमामृतं ॥ ५७ ॥ नैव बोधो न चाबोधो न बोधाबोध एव च ॥ यस्यदृश्यः सदा बोधो स बोधो
नान्यथा भवेत् ॥ ५८ ॥ ध्यानं न तर्को न समाधियोगो न देशकालो न गुरूपदेशः ॥ स्वभावसंविति
रहंच तत्त्वमाकाशकल्पं सहजं ध्रुवं च ॥ ५९ ॥ न जातोहं मृतो वापि न मे कर्म शुभाशुभं ॥ विशुद्ध
निर्गुणं ब्रह्म बंधमुक्तिः कथं भवेत् ॥ ६० ॥ यदि सर्वगतो देवो स्थिर पूर्णो निरंतरं ॥ अंतरं हि न प
श्यामि सबाह्याभ्यंतरं कथं ॥ ६१ ॥ स्फुरत्येव जगत्कृत्स्नमखंडित निरंतरं ॥ अहो माया महा मोहा
द्वैताद्वैत विकल्पनं ॥ ६२ ॥ साकारं च निराकारं नेति नेतीति सर्वथा ॥ भेदाभेद विनिर्मुक्तं वर्त्तते के

वस्तंशिवं॥६३॥ नतेचमाताभगिनीपिताचनतेचमित्रंनचशत्रुपुत्रः॥ नपक्षपातोनविप
क्षपातःकथंहिसंतप्तिरजाहिचेतः॥६४॥ दिवानक्तंनतेचित्तउदयास्तमनंनहि॥ विदेहस्यश
रीरत्वंकल्पयंतिकथंबुधाः॥६५॥ नविभक्तंविभक्तंचनहिदुःखसुखादिच॥ नहिसर्वमसर्वंच
विद्धिचात्मानमव्ययं॥६६॥ नाहंकर्तानभोक्ताचनमेकर्मपुरातनं॥ नमेदेहोविदेहोवानिर्ममेतिम
(5) मेतिकिं॥६७॥ नमेरागादिकोदोषोदुःखंदेहादिकंनमे॥ आत्मानंविद्धिमामेकंविशालंगगनोप
मं॥६८॥ सखेमनःकिंजयिनंफलंतेसखेमनःसर्वमिदंवितथ्यं॥ यत्सारभूतंकथितंमयातेत्वमेव
तत्त्वंगगनोपमंहि॥६९॥ येनकेनापिभावेनयत्रयत्रमृतःपुनः॥ योगिनस्तत्रलीयंतेघटाकाशोयथां
बरे॥७०॥ तीर्थेवांत्यजगेहेवानस्मृतीरपरित्यजन्॥ ज्ञानतत्त्वकलायुक्तःकेवल्यंयातिकेवलं॥७१॥
धर्मार्थकाममोक्षांश्चद्विपदादिचराचरं॥ मन्यंतेयोगिनःसर्वंमरीचिजलसंनिभं॥७२॥ अतीताना
गतंकर्मवर्तमानंतथैवच॥ नकरोमिनभुंजामिइतिमेनिश्चलामतिः॥७३॥ शून्यागारेसमरसपूत

(5A)

स्तिष्ठत्येकः स्वरूपमवधूतः॥ विचरति मग्नस्त्यक्त्वा गर्वं विंदति केवलमात्मनि सर्वं॥७४॥ तृतीयं
तुरीयं नहि नहि यत्र विंदति केवलमात्मनि तत्र॥ धर्माधर्मौ नहि यत्र बद्धो मुक्तः कथमिह तत्र॥७५॥
सर्वं शून्यमशून्यं च न च सत्यानृतं तथा॥ स्वभावभावितं प्रोक्तं नहि शास्त्रसंवित्तिपूर्वकं॥७६॥
विंदति विंदति नहि नहि मंत्रं छंदोलक्षणं नहि नहि तंत्रं॥ समरसमग्नो भावितपूतः प्रलपितमेतत्क
थमवधूतः॥७७॥ ॥ इति श्रीमद्दत्तात्रेय भगवत्वेदांतशास्त्रगुरुशिष्यसंवादे अवधूतगीतायां
स्वात्मसंवित्त्युपदेशो नाम प्रथमप्रकरणं॥ १॥ बालस्य वा विषयभोगरतस्य वापि मूर्खस्य सेवकज
नस्य गृहस्थितस्य॥ एतद्गुरोः किमपि नैव नहि चिंतनीयं रत्नं कथं त्यजति कोप्यशुचौ प्रविष्टं॥१॥
नैवात्र काव्यगुण एव तु चिंतनीयो ग्राह्यः परं गुणवता खलु सार एव॥ सिंदूरचित्ररहिता भुवि रूप
शून्या पारं न किं नयति नौरिव॥ तु कामान्॥२॥ प्रयत्नेन विना येन निश्चयेन चराचरं॥ ग्रस्तं स्व
भावतः शांतं चैतन्यं गगनोपमं॥३॥ अयत्नाच्चालयेद्यस्तु एक एव चराचरं॥ सर्वगं तत्कथं भिन्न

५ मद्वैतं वर्त्तते मम ॥ ४ ॥ अहमेव परं यस्मात्सारात्सारतरं शिवं ॥ गमागमविनिर्मुक्तं निर्विकल्पं निरा
कुलं ॥ ५ ॥ सर्वावयवनिर्मुक्तं तदहं त्रिदशार्चितं ॥ संपूर्णत्वान्न गृह्णामि विभागं त्रिदशाधिकं ॥ ६ ॥
ममाधिर्नैन संदेहः किं करिष्यामि वृत्तिवान् ॥ उत्पद्यंते प्रलीयंते बुद्बुदाश्च यथा जले ॥ ७ ॥ मह
(6) दादीनि भूतानि समाप्यैव सदैव तु ॥ मृदुद्रव्येषु तीक्ष्णेषु गुडेषु कटुकेषु च ॥ ८ ॥ कटुकत्वं च शैत्य
त्वं मार्दवत्वं यथा जले ॥ प्रकृतिः पुरुषस्तद्वदभिन्नः प्रतिभाति मे ॥ ९ ॥ सर्वाक्षररहितं यद्यत्सू
क्ष्मात्सूक्ष्मतरं परं ॥ मनोबुद्धींद्रियातीतमकलंकं जगत्पतिं ॥ १० ॥ अदृश्यं सहजं यत्र अहं तत्र
कथं भवेत् ॥ त्वमेव हि कथं तत्र कथं तत्र चराचरं ॥ ११ ॥ गगनोपमं तु यत्प्रोक्तं तदेव गगनोप
मं ॥ चैतन्यं दोषहीनं च सर्वज्ञं पूर्णमेव च ॥ १२ ॥ पृथिव्यां चरितं नैव मारुतेन न वाहितं ॥ वारि शिव
णा पीहितं नैव तेजोमध्ये व्यवस्थितं ॥ १३ ॥ आकाशं तेन संव्याप्तं न तद्व्याप्तं च केनचित् ॥ सबा ५
ह्याभ्यंतरं तिष्ठत्यवच्छिन्नं निरंतरं ॥ १४ ॥ सूक्ष्मत्वाददृश्यत्वान्निर्मलत्वाच्च योगिभिः ॥ आलं

(6A)

वनादियश्रोक्तं कमादालंबनं त्यजेत् ॥१५॥ सतताभ्यासयुक्तस्तु निरालंबो यदा भवेत् ॥ तत्
ल्लयाल्लीयते नांतर्गुणदोषविवर्जितं ॥१६॥ विषवृक्षस्य रौद्रस्य मोहमूर्छामदस्य च ॥ एकमेव वि
नाशाय अमोघं सहजामृतं ॥१७॥ भावग्राह्यं निराकारं साकारं दृष्टिगोचरं ॥ भावाभावविनिर्मुक्तं
अंतरालं तदुच्यते ॥१८॥ बाह्यभावं भवेद्विश्वं मंतः प्रकृतिरुच्यते ॥ अंतादंतनरंध्रेयं नारीकेल
फलं यथा ॥१९॥ भ्रांतिज्ञानं स्थितं बाह्यं सम्यक् ज्ञानं च मध्यमं ॥ मध्यामध्यतरंध्रेयं नारीकेल
फलं यथा ॥२०॥ पौर्णिमास्यां यथा चंद्र एक एवातिनिर्मलः ॥ तनस्तैमिरिकः पश्यद्द्विधा दृष्टिवि
पर्ययात् ॥२१॥ अनेनैव प्रकारेण बुद्धिभेदेन सर्वगः ॥ दैत्ताबुद्धूरना मा च गीयते नामकोटिभिः ॥
॥२२॥ गुरुप्राज्ञप्रसादेन मूर्खो वा यदि पंडितः ॥ यस्तु संबुध्यते तत्त्वं विरक्तो भवसागरात् ॥२३॥
रागद्वेषविनिर्मुक्तः सर्वसत्त्वहिते रतः ॥ दृढबोधश्च धीरश्च स गच्छेत्परमं पदं ॥२४॥ घटे भिन्ने
घटाकाशमाकाशे लीयते यथा ॥ देहाभावे तथा योगी स्वरूपे परमात्मनि ॥२५॥ उक्तेयं कर्मयुक्तानां

६ मतिर्या तेऽपि सा गतिः ॥ न चोक्ता कर्मयुक्तानां मतिर्या तेपि सा गतिः ॥ २६ ॥ या मतिः कर्मयुक्तानां
तां च वागेंद्रिसंवदेत ॥ योगिनां या गतिः क्वापि अगत्या भावनोज्झिता ॥ २७ ॥ एवं ज्ञात्वा त्वमुं मा
र्गं योगीनां नैव कल्पितं ॥ विकल्पवर्जनादेषां स्वयं सिद्धिः प्रवर्तते ॥ २८ ॥ तीर्थे वांत्यजगेहे वा
(७) यत्र यत्र मृतोपि वा ॥ न योगी पश्यते गर्भं परब्रह्मणि लीयते ॥ २९ ॥ सहजमजमचिंत्यं यस्तु प
श्येत्स्वरूपं घटति यदि यथेष्टं लिप्यते नैव दोषैः ॥ सकृदपि तदभावात्कर्म किंचिन्न कुर्यात्तदपि
[illegible]पि भवति बुद्धः संयमी वा तपस्वी ॥ ३० ॥ निरामयं निःप्रतिमं नि
राकृतिं निराश्रयं निर्वपुषं निराशिषं ॥ निर्द्वंद्वनिर्मोहमलुप्तशक्तिकं तमीशमात्मानमुपैति शा
श्वतं ॥ ३१ ॥ वेदो न दीक्षा न च मंडलं क्रिया गुरुर्न शिष्यो न च मंत्रसंपदः ॥ मुद्रादिकं चापि न यत्र शिव
मानसे तमीशमाश्वतं ॥ ३२ ॥ न शांभवी शाक्तिकमाणवं न वा पिंडं च रूपं च पदादिकं न वा ॥ आ ५
रंभनिष्पत्तिघटादिकं च नो तमी० ॥ ३३ ॥ यस्य स्वरूपात्सचराचरं जगदुत्पद्यते तिष्ठति ली

(7A)

येनपिवा ॥ नोयविकाराद्यवफेनबुद्बुदास्तमी॰॥ ३४ ॥ नानात्वमेकत्वमुभयत्वमन्यता अणुत्वदी
र्घत्वमहत्त्वशून्यता ॥ मानत्वमेयत्वसमत्ववर्जितं तमी॰॥ ३५ ॥ न संनिरोधो न च दृष्टिरासनं बंधो
विबंधोपि न यत्र भासते ॥ नाडीप्रचारोपि न यत्र किंचन तमी॰॥ ३६ ॥ मनो न बुद्धिर्न शरीरमींद्रियं
तन्मात्रभूतानि न भूतपंचकं ॥ अहंकृतिश्चापि न यत्स्वरूपकं तमी॰॥ ३७ ॥ सुसंयमीवायदिवा
न संयमी सुसंग्रहीवा यदिवा न संग्रही ॥ निष्कर्मको वा यदिवा सकर्मको आत्मप्रबोधं न विमुंचे ध्रुवं ॥
॥ ३८ ॥ विधौ निरोधे परमार्थतां गते योगी पुनश्चात्मसहि भेदवर्जितं ॥ शौचं न शौचं यदि लिंगभंगो वा
वि से विधेये यदि वा न चैते ॥ ३९ ॥ मनो वचो यत्र न शक्तमीरितुं नूनं कथं तत्र गुरूपदेशाः ॥१ यः क
था मुक्तवतां गुरूणां मुक्तस्य तत्त्वं च समं प्रकाशन ॥ ४० ॥ विंदति विंदति न हि न हि मंत्रं समरसमग्नो
भावितपूतः ॥ छंदोलक्षणनहिनहितंत्रं प्रलपितमेतत्कथमवधूतः ॥ ४१ ॥ ॥ ॥
इति श्रीदत्तात्रेयविरचितं भेदखंडनं द्वितीयं प्रकरणं ॥ २ ॥ श्रीसच्चिदानंदगुरुमूर्त्तये नमः ॥

गुणविगुणविभागो वर्त्तते नैव किंचित् रतिविरतिविहीनं निर्मलं निःप्रपंचं ॥ त्रिगुणगुणविहीनं
७ व्यापकं विश्वरूपं कथमहमिह वंदे व्योमरूपं शिवं च ॥१॥ श्वेतादिवर्णरहितं हि वयं शिवं च कार्यं हि कार
णमिदं हि वयं शिवं च ॥ एवं विकल्पविगता हि वयं शिवं च स्वं आत्मानमात्मनि सुमित्र कथं नमामि ॥२॥ नि
र्मूलमूलरहितो हि सदोदितोऽहं निर्धूमधूमरहितो हि सदोदितं वा ॥ निर्दीपदीपरहितो हि सदोदितोऽहं
(8) ज्ञानामृतं समरसं गगनोपमोऽहं ॥३॥ निष्काममकाममिह नाम कथं वदामि निःसारसाररहितं च कथं व
दामि ॥ निःसंगसंगमिह नाम कथं वदामि ज्ञानामृतं स० ॥४॥ अद्वैतरूपमखिलं हि कथं वदामि नित्यं
अनित्यमखिलं हि कथं वदामि ॥ सत्यं असत्यमखिलं च कथं वदामि ज्ञानामृतं समरसं० ॥५॥ स्थूलं हि नो
न हि कृशं न गतागतं हि नाद्यंतमध्यरहितं न परापरं हि ॥ सत्यं वदामि खलु भो परमार्थतत्त्वं ज्ञाना० ॥६॥
संविद्धि सर्वकरणानि नभोनिभानि संविद्धि सर्वविषयाश्च नभोनिभाश्च ॥ संविद्धि चैकममलं सम
बंधमुक्तं ज्ञाना० ॥७॥ दुर्बोधबोधगहनो न भवामि तात दुर्लक्ष्यलक्ष्यगहनो न भवामि तात ॥ आसन्नरू

निर्लोभलोभपदवीति न मे विकल्पो

(8 A) पगहेनो न भवामि तातज्ज्ञाना ०॥८॥ निर्भाव भावसहितो न भवामि वत्स निर्योग योगसहितो न भवामि व
त्स॥ निश्चिंत चिंतसहितो न भवामि वत्सज्ञा ०॥९॥ निर्मोह मोहपदवीति न मे विकल्पो निःशोक शोकपदवीति न शोक
मे विकल्पः॥ज्ञाना ०॥१०॥ संसारसंततिलता न च मे कदाचित्संतापसंततिसुखं न च मे कदाचित्॥ अज्ञान
बंधनमिदं न च मे कदाचिज्ज्ञाना ०॥११॥ संतापसंततिनो न च मे विकारः संसारसंततिमनो न च मे वि त
कारः॥ सत्वं स्वधर्मजनितं न च मे विकारो ज्ञा ०॥१२॥ संतापदुःखजनकं न मनः कदाचित्संतापमोहज
नकं न च धी कदाचित्॥ यस्मादहंकृतिरियं न च मे कदाचिज्ज्ञाना ०॥१३॥ निष्कंप कंपनिधनं न विक
ल्पकल्पं स्वप्नप्रबोधनिधनं न विवाहिवाहि॥ निःसार सारनिधनं चचराचरं हि ज्ञाना ०॥१४॥ नो वेद
वेदकमिदं न च मे तु तर्कवाचामगोचरमिदं न मनो न बुद्धिः॥ एवं कथं हि भवतः कथयामि तत्वं ज्ञा ०॥१५॥
न भिन्नभिन्नरहितं परमार्थतत्वं अंतर्बहिर्न हि कथं परमार्थतत्वं॥ चाकंपभवं न चरतं न हि वस्तु
किंचिज्ज्ञा ०॥१६॥ रागादिदोषरहितं त्वमेव तत्वं द्वैतादिदोषरहितं त्वमेव तत्वं॥ द्वेषादिदोषरहितत्व

अ०गी०

(१)

दमेवतत्वंज्ञा०॥१७॥स्थानंत्रयंयदिचनेतिकथंतुरीयंतुर्यपदंयदिचनेतिनखंदिशाश्च॥शांतंप
देहिपरमंपरमार्थतत्वंज्ञा०॥१८॥दीर्घोलघुःपुनरितीहनेमविभागाविस्तारसंघटमितीहनमवि
भागः॥कोणाहिवर्तुलमितिहनमेविभागोज्ञाना०॥१९॥मातापिताचतनयादिनमेकदाचित् ज्ञा
नामृतंनचमनोनचमेकदाचित्॥निर्व्याकुलंस्थिरमिदंपरमार्थतत्वंज्ञानामृ०॥२०॥विशुद्धशुद्धम
विचारमानंदरूपंनिर्लेपलेपमविचारमनादिरूपं॥निःखंडखंडमविचारमनंतरूपंज्ञा०॥२१॥
ब्रह्मादयःस्फुरणाःकथमत्रसंतिस्वर्गादयोवसतयःकथमत्रसंति॥यद्येकरूपममलंपरमार्थत
त्वंज्ञा०॥२२॥निर्नेतिनेतिविमलोहिकथंभवामि निःशोकशोकविमलोहिकथंभवामिज्ञा०॥२३॥
निःकर्मकर्मपरमंसततंकरोमिनिःसंगरूपसहितंसततंविनोदं॥सत्वामृतंतिरचनानचमेविनो
दोज्ञाना०॥२४॥आरंभहीनमखिलंचनिरामयंच [redacted] विज्ञानरूपमखिलंध शिव
पमानहिनं॥संतप्तसर्वरहितंनगृहपूर्ण [redacted] पूर्णज्ञाना०॥२५॥मायाप्रपंचरचनानचमेविकारो

४ निःशांतिशांतिविमलोहिकथंभवामि ४

सत्यंवदामिसरजावततनैवजातुं।।

(9A)

कोटिल्यदंबरचनानचेमविकारः।।सत्यान्ततेति बचनानचेमविकारोज्ञा०।।२६।।सत्यंवदामिनिरजाव
तनेवजातुं।।सत्यंकथंह्निसततंतुस्त्रितंतवेवज्ञा०।।२७।।संध्यादिकालरहितंनहियोगयोगः स्वप्नप्रबोध
रहितंबधिरोनमूकः।।एवंविकल्परहितंहिविभावयुडंज्ञा०।।२८।।निर्नाथनाथरहितंहिनिराकुलंवैनि
श्चित्तचित्तविगतंहिनिराकुलंवै।।संविड्डिसर्वविगतंहिनिराकुलंवेज्ञा०।।२९।।कांतारमंदिरमिदंहिक
थंवदंतिसंविड्डिसंशयमिदंहिकथंवदंमि।।एकंनिरंतरसमंहिनिरंजनंहिज्ञानामृ०।।३०।।निर्जीवजीव
रहितंसततंविभातिनिर्बीजबीजरहितंसततंविभाति निबो[redacted]धबोधरहितंसततंविभातिज्ञाना०।।३१।।
संभूतिवर्जितमिदंसततंविभातिसंहारवर्जितमिदंसततंविभाति।।संसारवर्जितमिदंसततंविभातिज्ञा०।।
।।३२।।उल्लेखमात्रमपितनहिवस्तुकिंचित्‌निर्लज्जमानसकरोषिकथंविलापं।।ज्ञातेसदाक्षरपरंपरमा
र्थतत्वंज्ञा०।।३३।।किंनामरोदसिसखेनजरानमृत्यु किंनाम०नचजन्मदुःखं।।किंना०नचतेविषादाज्ञा०।।
।।३४।।किंना०नचेतस्वरूपंकिंना०विरूपं।।किंना०।।[redacted]।।किंना०नचेतेजपाश्चकिं
नचतेरिमित्रंज्ञाना०३५।।[redacted]

अ०गी०

९ ना० नु पांसि ॥ किं ना० तेंद्रियाणि ज्ञाना०॥३६ किं० प्रकामः किं० प्रकोपः ॥ किं० प्रमोहो ज्ञाना०॥३७॥
ऐश्वर्यमिच्छसि कथं न च ते धनानि ऐश्व० न च ते च पत्नी ॥ ऐश्व० न च ते मम मे ति ज्ञा०॥३८॥ लिंगत्रयं च
ननु मित्र न ते न मे च निर्भेद भेद नु हि भिन्न न ते न मे च ॥ निर्लज्ज मानस कथं हि विभाति भिन्नं ज्ञा०॥३९॥
(१०) ध्याता न ते हृदये हि न च ते समाधिर्ध्येयं न ते हृदये हि न च ते समाधिः ॥ ध्यानं न ते हृदये हि न च मे समाधिर्ज्ञा०॥
४१॥ नो चाणुमात्रमपि ते हि विरागरूपं नो चा० सरागरूपं ॥ नो चा० विरागरूपं ज्ञा०॥४०॥ कथमिह प
रमार्थतत्त्वमानंदरूपं कथ० तत्त्वमनंतरूपं ॥ कथ० [illegible]त्वविज्ञानरूपं यदि वरमिदमेकं वर्त्तते व्योमरूपं ॥
॥४२॥ दहनपवन हीनं विद्धि विज्ञानमेकं अवनिजलविहीनं विद्धि विज्ञानमेकं ॥ सकलगगनहीनं
विद्धि विज्ञानमेकं गगनमिव विशालं विद्धि विज्ञानमेकं ॥४३॥ न शून्यरूपं न विशून्यरूपं न शुद्धरूपं
परमार्थतत्त्वं ॥४४॥ सत्यं च सारस्य हितं कथितं मया तेन त्वं हि नाहमिह भो न गुरुर्न शिष्यः ॥ स्वेच्छस्व शिव
रूपसहजं परमार्थतत्त्वं ज्ञानामृतं समरसं गगनोपमोऽहं ॥४५॥ मुंच मुंच विषं नारीं न त्यागं मुंचस ९

वृथा ॥ त्यागात्यागं विषं मुंच अमृतं सहजं ध्रुवं [redacted] ॥४६॥ विंदति विंदति न हि न हि मंत्रं छंदो लक्षणं न हि न हि
तंत्रं ॥ समरसमग्नो भावितपूतः प्रलपितमेतत्कथमवधूतः ॥४७॥ ॥इति श्रीदत्तात्रेयविरचितं अवधूतगी
(10A) तायां ज्ञानामृतं तृतीयप्रकरणं ॥३॥ ॥ नावाहनं नैव विसर्जनं वा पुष्पाणि पत्राणि कथं भवामि ॥ ध्यानानि
मंत्राणि कथं भवंति समासमं चैव शिवार्चनं च ॥१॥ न केवलं बद्धविबंधमुक्तो न केवलं शुद्धविशुद्धमुक्तः ॥
न केवलं योगवियोगमुक्तः स वै विमुक्तो गगनोपमोहं ॥२॥ संजायते सर्वमिदं वितथ्यं न जायते सर्वमिदं
वितथ्यं ॥ एवं विकल्पो मम नैव जातः सं विद्धि निर्वाणमनामयोहं ॥३॥ निर्व्यंजनं नैव निरंजनं वा न वांतरं
वापि निरंतरं वा ॥ अंतर्बहिर्भाति न मे विभाति सं विद्धि निर्वाण ०॥४॥ न धर्मयुक्तो न च पापयुक्तो न मोक्षयु
क्तो न च बंधयुक्तः ॥ युक्तं न युक्तं न च मे विभाति सं वि० ॥५॥ परापरं चा न च मे कदाचित् मध्यस्थभावोपि न
चाविचित्रं ॥ हिताहितं न हि कथं वदामि सं विद्धि निर्वाण० ॥६॥ नोपासकं नैव मुपास्यरूपं न चोपदेशो न
च मे क्रियाश्च सं विस्य संवित्ति कथं वदामि सं० ॥७॥ न व्यापकं वोप्यमिहास्ति किंचित् न चालयं वापि हि चाल

## मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com